# श्यामला दंडकम्

**। ध्यानम् ।**

माणिक्यवीणामुपलालयन्तीं मदालसां मंजुलवाग्विलासाम् ।
माहेंद्रनीलद्युतिकोमलांगीं मातंगकन्यां मनसा स्मरामि ॥

चतुर्भुजे! चंद्रकलावतंसे! कुचोन्नते! कुंकुमरागशोणे! ।
पुंड्रेक्षु- पाशांकुश-पुष्पबाणहस्ते! नमस्ते जगदेकमातः! ॥

**। विनियोगः ।**

माता मरकतश्यामा मातंगी मधुशालिनी ।
कुर्यात् कटाक्षं कल्याणी कदंबवनवासिनी ॥

**। स्तुति ।**

जय मातंगतनये! जय नीलोत्पलद्युते! ।
जय संगीतरसिके! जय लीलाशुकप्रिये! ॥

**। दंडकम् ।**

जय जननि! सुधासमुद्रांत-रुद्यन्मणिद्वीप-संरूढ-बिल्वाटवीमध्य-कल्पद्रुमाकल्प-कादंबकान्तार-वासप्रिये! कृत्तिवासप्रिये!

सादरारब्ध-संगीत-संभावना-संभ्रमालोल-नीपस्रगाबद्ध-चूलीसनाथत्रिके! सानुमत्पुत्रिके!

© 2022 Vedam Nadam

शेखरीभूत-शीतांशुरेखा-मयूखावलीनद्ध- सुस्निग्ध-नीलालकश्रेणि-
शृंगारिते! लोकसंभाविते!

कामलीला-धनुस्सन्निभ-भ्रूलता-पुष्प-संदेह-कृच्चारु-गोरोचना-पंककेली-
ललामाभिरामे! सुरामे! रमे!

प्रोल्लसद्वालिका-मौक्तिकश्रेणिका-चंद्रिकामंडलोद्भासि-
लावण्यगंडस्थलन्यस्त-कस्तूरिकापत्ररेखा- समुद्भूत-सौरभ्य-संभ्रान्त-
भृंगांगना-गीतसांद्रीभवन्मंद्र- तन्त्रीस्वरे! सुस्वरे! भास्वरे!

वल्लकी-वादनप्रक्रियालोल-तालीदलाबद्ध-ताटंकभूषा-विशेषान्विते!
सिद्धसम्मानिते!

दिव्यहालामदोद्वेल-हेला-लसच्चक्षुरान्दोलन-श्रीसमाक्षिप्त-कर्णैक-
नीलोत्पले! निर्मले!
पूरिताशेषलोकाभिवांछाफले! श्रीफले!

स्वेद-बिंदूल्लसत्फाल-लावण्य-निष्यंद-संदोह-संदेहकृन्नासिकामौक्तिके!
सर्वमंत्रात्मिके! कालिके!

कुंद-मंदस्मितोदार-वक्त्र स्फुरत्पूग-कर्पूर-तांबूल-खंडोत्करे!
ङ्ज्ञानमुद्राकरे! श्रीकरे!

कुंदपुष्पद्युतिस्निग्ध-दंतावली-निर्मलालोल-कल्लोल-सम्मेलनस्मेर-
शोणाधरे! चारुवीणाधरे! पक्वबिंबाधरे!

© 2022 Vedam Nadam

सुललित-नवयौवनारंभ-चंद्रोदयोद्वेल-लावण्य-दुग्धार्णवाविर्भवत्कंबु-बिब्बोक-हृत्कंधरे! सत्कलामंदिरे! मंथरे!

दिव्यरत्नप्रभ बंधुरच्छन्न वीरादिभूषा-समुद्द्योतमानानवद्यांगशोभे! शुभे!

रत्नकेयूर-रश्मिच्छटापल्लव-प्रोल्लसद्दोर्लताराजिते! योगिभिः पूजिते!

विश्वदिङ्मंडलव्यापि-माणिक्य-तेजस्स्फुरत्कंकणालंकृते! विभ्रमालंकृते साधुभिस्सत्कृते!

वासरारंभ-वेला-समुज्जृंभमाणारविंद-प्रतिच्चन्न-पाणिद्वये! संततोद्यद्वये! अद्वये!

दिव्यरत्नोर्मिका-दीधिति-स्तोम- संध्यायमानांगुली-पल्लवोद्यन्नखेंदु-प्रभामंडले! सन्नुताखंडले! चित्प्रभामंडले! प्रोल्लसत्कुंडले!

तारकाराजिनीकाश-हारावलिस्मेरचारु-स्तनाभोगभारानमन्मध्यवल्ली-वलिच्छेद- वीथीसमुल्लास-संदर्शिताकार-सौंदर्यरत्नाकरे! वल्लकीभृत्करे! किंकर! श्रीकरे!

हेमकुंभोपमोत्तुंग-वक्षोजभारावनम्रे! त्रिलोकावनम्रे!

लसद्वृत्त-गंभीर-नाभीसरित्तीर-शैवालशंकाकरश्याम-रोमावली भूषणे! मंजुसंभाषणे!

चारुशिंजत्कटीसूत्र-निर्भत्सितानंग-लीलाधनुः-शिंजिनीडंबरे! दिव्यरत्नांबरे!
पद्मरागोल्लसन्मेखला-भास्वरश्रोणि-शोभाजित-स्वर्णभूभृत्तले!
चंद्रिकाशीतले!

विकसितनवकिंशुकाताम्रदिव्यांशुकच्छन्न-चारूरुशोभापराभूत-सिंदूर-शोणायमानेंद्र-मातंग-हस्तार्गले! वैभवानर्गले! श्यामले!

कोमल-स्निग्ध-नीलोत्पलोत्पादितानंग-तूणीर-शंकाकरोद्दाम-जंघालते!
चारुलीलागते!

नम्र-दिक्पाल-सीमंतिनी- कुंतल-स्निग्ध- नील-प्रभापुंज-संजात-दुर्वांकुराशंक-सारंग-संयोग-रिंखन्नखेंदूज्ज्वले! प्रोज्ज्वले! निर्मले!

देवदेवेश-दैत्येश-यक्षेश-भूतेश-वागीश-कोणेश-वाय्वग्नि-कोटीर-माणिक्य-संघृष्ट- बालातपोद्दाम-लाक्षारसारुण्य तारुण्यलक्ष्मी-गृहीतांघ्रिपद्मद्वये! अद्वये!

सुरुचिरनवरत्नपीठस्थिते! सुस्थिते! रत्नसिम्हासने!
शंकपद्मद्वयोपाश्रिते! आश्रिते!
देवि! दुर्गावटुक्षेत्रपालैर्युते!
मत्तमातंग कन्यासमूहान्विते!
मंजुला मेनकाद्यंगना मानिते भैरवैरष्टभिर्वेष्टिते!
देवि! वामादिभिः शक्तिभिःसंश्रिते!
लक्ष्म्यादिशक्त्यष्टकासेविते! भैरवीसंवृते!

पंचबाणेन रत्या च संभाविते!
मातृकामंडलैर्मंडिते यक्षगंधर्वसिद्धांगना मंडलैरर्चिते!
प्रीतिशक्त्या वसंतेन चानंदिते!
भक्तिभाजां परंश्रेयसे कल्पसे! छंदसामोजसा भ्राजसे! योगिनां मानसे ध्यायसे!

गीतविद्यानु योगातितृष्णेन कृष्णेन संपूज्यसे! भक्तिमच्चेतसा वेधसा स्तूयसे! विश्वहृद्येन वाद्येन विद्याधरैर्गीयसे!

सर्वसौभाग्य वांछावतीभिर्वधूभिस्सुराणां समाराध्यसे!

सर्वविद्या विशेषान्वितं चाटुगाथा समुच्चारणं
कंठमुलोल्लसद्वर्णरेखान्वितं कोमलं श्यामलोदार पक्षद्वयं
तुंडशोभातिदूरीभवत् किंशुकाभं शुकं लालयंती परिक्रीडसे!

पाणिपद्म-द्वये नादरेणाक्षमालागुणं स्फाटिकं ज्ञानसारात्मकं पुस्तकं बिभ्रती येन संचिंत्यसे तस्य वक्त्रांतरात् गद्यपद्यात्मिका भारती निस्सरेत् ।

येन वा त्वं  सनाथाकृतिर्भाव्यसे तस्य वश्या भवंति स्त्रियः पूरुषाः सोऽपि लक्ष्मीसहस्रैः परिक्रीडते ।

तस्य लीला सरोवारिधिः । तस्य केलीवनं नंदनं ।
तस्य भद्रासनं भूतलं । तस्य गीर्देवता किंकरि । तस्य चाज्ञाकरी श्रीः स्वयं ।

सर्वतीर्थात्मिके! सर्व तन्त्रात्मिके! सर्व यन्त्रात्मिके! सर्व मन्त्रात्मिके! सर्व पीठात्मिके! सर्व तत्वात्मिके! सर्व विद्यात्मिके! सर्व योगात्मिके! सर्व नादात्मिके! सर्व शब्दात्मिके! सर्व विश्वात्मिके! सर्व दीक्षात्मिके! सर्व मुद्रात्मिके! सर्व शक्त्यात्मिके! सर्व वर्णात्मिके! सर्व रूपे!
जगन्मातृके! हे जगन्मातृके पाहि मां पाहि देवि!
तुभ्यं नमो देवि! तुभ्यं नमो देवि! तुभ्यं नमो देवि नमो नमः ॥

॥ इति कालिदास विरचित श्यामला दंडकं संपूर्णम् ॥

© 2022 Vedam Nadam